শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

## শ্রী শঙ্করাচার্য ৱিরচিতম্

# ॥শ্রী বালমুকুন্দাষ্টকম্ ॥

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*]This was typeset using Bengali for TeX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রী বালমুকুন্দাষ্টকম্ ॥

করারৱিন্দেন পদারৱিন্দং মুখারৱিন্দে ৱিনিৱেশযন্তম্।
ৱটস্য পত্রস্য পুটে শযানং বালং মুকুন্দং মনসা স্মরামি॥ ১ ॥

সংহৃত্য লোকান্ ৱটপত্রমধ্যে শযানমাদ্যন্তৱিহীনরূপম্।
সর্ৱেশ্বরং সর্ৱহিতাৱতারং বালং মুকুন্দং মনসা স্মরামি॥ ২ ॥

ইন্দীৱরশ্যামলকোমলাঙ্গং ইন্দ্রাদিদেৱার্চিতপাদপদ্মম্।
সন্তানকল্পদ্রুমমাশ্রিতানাং বালং মুকুন্দং মনসা স্মরামি॥ ৩ ॥

লংবালকং লংবিতহারযষ্টিং শৃঙ্গারলীলাঙ্কিতদন্তপঙ্কতিম্।
বিংবাধরং চারুৱিশালনেত্রং বালং মুকুন্দং মনসা স্মরামি॥ ৪ ॥

শিক্যে নিধাযাদ্য পযোদধীনি বহির্গতাযাং ৱ্রজনাযিকাযাম্।
ভুক্তৱা যথেষ্টং কপটেন সুপ্তং বালং মুকুন্দং মনসা স্মরামি॥ ৫ ॥

কলিন্দজান্তস্থিতকালিযস্য ফণাগ্ররঙ্গে নটনপ্রিযন্তম্।
ততপুচ্ছহস্তং শরদিন্দুৱক্ত্রং বালং মুকুন্দং মনসা স্মরামি॥ ৬ ॥

উলূখলে বদ্ধমুদারশৌর্যং উত্তুঙ্গযুগ্মার্জুনভঙ্গলীলম্।
উতফুল্লপদ্মাযতচারুনেত্রং বালং মুকুন্দং মনসা স্মরামি॥ ৭ ॥

আলোক্য মাতুর্মুখমাদরেণ স্তন্যং পিবন্তং সরসীরুহাক্ষম্।
সচ্চিন্ময়ং দেৱমনন্তরূপং বালং মুকুন্দং মনসা স্মরামি॥ ৮ ॥

॥ইতি শ্রী বালমুকুন্দাষ্টকম্ সমাপ্তম্॥